# पादवार्षिकमूल्यनिर्णयः - संस्कृतम्

## कक्ष्या - VIII

प्रश्नसञ्चयः अक्कादमिक - संस्कृतविद्यालयानां कृते (Part I)

# १. जीवहेतुः

## 1. प्रश्ननिर्देशः।

खण्डिकां पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।

### प्रश्नपाठः।

लोकोऽयं पञ्चभूतात्मकः भवति। एवं मनुष्याणां पक्षिमृगादीनां शरीरमपि। भूमिः जलं, तेजः वायुः आकाशमिति पञ्चभूतानि। अस्माकं शरीरस्य संरक्षणे यथा जलम् आवश्यकम् अत्यन्तोपकारकं च तथैव अन्येषां जन्तूनामपि। पृथिव्याः वायोः च मलिनीकरणं जलमलिनीकरणकारणं भवति। एतेषां संरक्षणेनैव भूतानां संरक्षणं कर्तुं वयं शक्नुमः।

(अ) अयं लोकः कीदृशः भवति?

(आ) पञ्चभूतानि कानि?

(इ) शरीरस्य संरक्षणे अत्यन्तोपकारकं किम्?

(ई) 'अप्' इत्यर्थे खण्डिकायां प्रयुक्तं पदं किम्?

(उ) तेन + एव - तेनैव। एतादृशसन्धियुक्तपदं खण्डिकातः चित्वा लिखतु।

(ऊ) खण्डिकायाः उचितं शीर्षकं लिखतु।

### पाठ्यचर्योद्देश्यम्।

गद्यांशं पठित्वा आशयावबोधः।

### मानसिकव्यापाराः

आशयापग्रथनम्।

समयः - 12 निमेषाः

अङ्काः - 6

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकैकोऽङ्कः।

## 2. प्रश्ननिर्देशः।

अधः एकं निवेदनं लिखितमस्ति। निवेदने रिक्तस्थानानि उचितया रीत्या पूरयतु।

**प्रश्नपाठः।**

........................ विद्यालयछात्रैः ग्रामाध्यक्षसमक्षं सादरं समर्पितं निवेदनम्।

........................ (उचितं सम्बोधनम्)

विषयः ........................।

सूचनाः ........................।

अस्माकं विद्यालये जलाभवात् छात्राः महान्तं क्लेशमनुभवन्ति। तत्परिहारार्थं ........................ ........................ ........................ ........................ ........................ कार्याणि कर्तुं शक्यन्ते। तदर्थं भवता उचितं धनसाहाय्यं करणीयमिति प्रार्थयामहे।

सविनयम्

........................ ........................

........................ हस्ताक्षरम्

**पाठ्यचर्योद्देश्यम्।**

समस्यापरिहरणसामर्थ्यम्। निवेदनलेखनसामर्थ्यम्।

**मानसिकव्यापाराः**

आशयक्रमीकरणं, पत्रस्वरूपावगमनं च।

समयः - 12 निमेषाः

अङ्काः - 6

**मूल्यनिर्णयसूचकाः** (अ) उचितं सम्बोधनम्। - 1

(आ) विषयस्य लेखनम्। - 1

| | | | |
|---|---|---|---|
| (इ) | आशयसन्निवेशः। | - | 3 |
| (ई) | स्थलनाम, तिथि इत्यादीनां लेखनम् | - | 1 |
| | **आहत्य** | **-** | **6** |

## 3. प्रश्ननिर्देशः।

खण्डिकां पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।

### प्रश्नपाठः।

शरीरं पाञ्चभौतिकम् इत्युच्यते। पञ्चभूतेषु जलमस्माकं जीवनं सर्वसम्पन्नं करोति। 'अप एव ससर्जादौ' इति स्मृतिवचनेन जलस्य प्रथमासृष्टिरिति अवगम्यते। 'आपोमयः प्राणः' इति उपनिषद्वाक्यं प्रसिद्धम्। अनेन प्राणस्य जलमयत्वमुच्यते।

(अ) खण्डिकायां प्रयुक्तम् आप्तवाक्यद्वयं चित्वा लिखत।

(आ) 'इत्यवगम्यते' इति पदम् इति + अवगम्यते इति, एवं चेत् 'इत्युच्यते' इति पदस्य पदच्छेदः ?

(इ) खण्डिकां मातृभाषया लिखतु।

### पाठ्यचर्योद्देश्यम्।

जलसम्बन्धीनि आप्तवाक्यानि विवेचयति। वाक्यानां भाषान्तरीकरणसामर्थ्यम्।

### मानसिकव्यापाराः

आशयापग्रथनं, प्रयोगसामर्थ्यं च।

समयः - 16 निमेषाः

अङ्काः - 8

**मूल्यनिर्णयसूचकाः** (अ) अप एव ससर्जादौ, आपो मयः प्राणः - (द्वौ अङ्कौ)

(आ) इति + उच्यते - (एकः अङ्कः)

(इ) एकैकस्य वाक्यस्य विवर्तनाय एकैकोऽङ्कः।

**आहत्य पञ्चाङ्काः।**

# ६. तदा वृष्टिरजायत

## 1. प्रश्ननिर्देशः।

राज्ञः, लोमपादस्य, मन्त्रिणः, पुरोहितस्य च सम्भाषणे रिक्तस्थानानि उचितया रीत्या पूरयतु।

## प्रश्नपाठः।

मन्त्री - जयतु जयतु ............

महाराजः - स्वागतं भोः, ............ ............ ............?

पुरोहितः - महाराज, अस्माकं राज्यस्य अवस्था दयनीया भवति।

महाराजः - ......................................

मन्त्री - अनावृष्ट्या सांक्रमिकरोगाः प्रसरन्ति। प्रजाः अकालमृत्युम् उपयान्ति। भीताः जनाः देशान्तरं गच्छन्ति।

महाराजः - इमाम् अवस्थां परिहर्तुम् उपायत्रयं निर्दिशतु।

पुरोहितः - ..............................................................।

महाराजः - एवं चेत् तदर्थं शीघ्रं यत्नं कुरु।

मन्त्री - ..........................................................................।

## पाठ्यचर्योद्देश्यम्।

सम्भाषणरचनायै सामर्थ्यं सम्पादयति। निर्दिष्टविषयानुसारम् आशयविपुलीकरणम्।

## मानसिकव्यापाराः

आशयं स्वीकृत्य सन्दर्भानुसारं सम्भाषणरचना।

समयः - 14 निमेषाः

अङ्काः - 7

**मूल्यनिर्णयसूचकाः** प्रथमद्वितीयतृतीयपूरणानां पञ्चमपूरणस्य च एकैकोऽङ्कः।

1 x 4 - 4 अङ्काः।

चतुर्थपूरणस्य त्रयः अङ्काः। एकैकस्य उपायस्य एकैकोऽङ्कः।

## 2. प्रश्ननिर्देशः।

सूचनाः उपयुज्य अनावृष्टेः दोषान् तत्परिहारान् च अधिकृत्य लघुटिप्पणीं रचयतु।

**प्रश्नपाठः।**

सूचनाः - कृषिनाशः ___ जलदौर्लभ्यम् ___ पानजलदौर्लभ्यम् ___ सांक्रमिकरोगाः ___ दुर्भिक्षम् ___ परिहारोपायाः ___ वनवत्करणम् ___ जलसंरक्षणपद्धतीनाम् आसूत्रणम्।

(दुर्भिक्षम् - दारिद्र्यम्)

**पाठ्यचर्योद्देश्यम्।**

निर्दिष्टविषयानधिकृत्य सूचनानुसारं टिप्पणीलेखनम्।

**मानसिकव्यापाराः**

आशयापग्रथनं नूतनाशयानां सन्निवेशश्च।

समयः - 12 निमेषाः

अङ्काः - 6

**मूल्यनिर्णयसूचकाः** सूचनास्वीकाराय - द्वौ अङ्कौ।

आशयविपुलनाय - त्रयः अङ्काः।

आशयपूर्णतायै - एकः अङ्कः।

## 3. प्रश्ननिर्देशः।

अधः दत्तां खण्डिकां मातृभाषायां लिखतु।

**प्रश्नपाठः।**

ग्रामे पानजलकूपः एक एव। सर्वे ततः एव जलं नयन्ति। प्रभाते एव पानजलं नेतुम् आगता सीता कूपात् निर्गतं मृत्तैलगन्धं ज्ञातवती। सा पुनः पुनः जलम् अजिघ्रत्। जलं मृत्तैलगन्धमयम् आसीत्।

(मृत्तैलम् - മണ്ണെണ്ണ, अजिघ्रत् - മണത്തു)

**पाठ्यचर्योद्देश्यम्।**

संस्कृतभाषायाः मातृभाषायां भाषान्तरीकरणनैपुणीसम्पादनम्।

**मानसिकव्यापाराः**

आशयापग्रथनम्, उचितपदचयनं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य वाक्यस्य भाषान्तरीकरणाय एकैकोऽङ्कः।

## 4. प्रश्ननिर्देशः।

अधोदत्तां खण्डिकां मातृभाषायां लिखत।

**प्रश्नपाठः।**

पुरा सूर्यवंशे भगीरथः नाम राजा आसीत्। सः गङ्गां भुवमानेतुं निश्चिकाय। तदर्थं कठिनं तपः अकरोत्। तस्य तपसा संप्रीता गङ्गादेवी प्रत्यक्षीभूता। भगीरथस्तु पितॄणां मोक्षार्थं पातालपर्यन्तम् अनुगमनाय गङ्गां ययाचे।

**पाठ्यचर्योद्देश्यम्।**

संस्कृतभाषायाः मातृभाषायां भाषान्तरीकरणसामर्थ्यसम्पादनम्।

**मानसिकव्यापाराः**

आशयापग्रथनम्, उचितपदचयनं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य वाक्यस्य भाषान्तरीकरणाय एकैकोऽङ्कः।

# ७. लोकहिताय

## 1. प्रश्ननिर्देशः।

सूचनायां दत्तप्रयोजनानुसारम् आसनस्य नाम कोष्ठकात् चित्वा लिखतु।

**प्रश्नपाठः।**

१. एकाग्रता लभ्यते, आत्मविश्वासः वर्धते।

२. श्रोणीभागस्थ दुर्मेधो नश्यति, दहनशक्तिः वर्धते।

(ऊर्ध्वहस्तासनम्, वृक्षासनम्, अर्धकटिचक्रासनम्)

**पाठ्यचर्योद्देश्यम्।**

योगविद्यायाः प्राधान्यमवगच्छति।

**मानसिकव्यापाराः**

विवेचनम्।

समयः - 4 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** समुचितस्य उत्तरस्य एकैकोऽङ्कः।

## 2. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः।**

| *अ* | | *आ* |
|---|---|---|
| पतञ्जलिः | - | आयुर्वेदः |
| आसनम् | - | षट्संख्याकाः |
| शुद्धयः | - | सुखदमनुकूलम् |
| चरकः | - | घेरण्डसंहिता |
| | - | योगसूत्रम् |

**पाठ्यचर्योद्देश्यम्।**

आशयग्रहणं विवेचनं च।

**मानसिकव्यापाराः**

आशयग्रहणं विविच्य ज्ञानं च।

समयः - 8 निमेषाः

अङ्काः - 4

**मूल्यनिर्णयसूचकाः** समुचितस्य उत्तरस्य एकैकोऽङ्कः।

## 3. प्रश्ननिर्देशः।

सूचनानुसारं शवासनस्य प्रयोजनानि लिखत।

**प्रश्नपाठः।**

- क्षीणापनयनम्।
- रक्तातिमर्दः।
- एकाग्रतावर्धनम्।
- ऊर्ज्वस्वलता।

**पाठ्यचर्योद्देश्यम्।**

दत्तविषयमधिकृत्य टिप्पणीलेखनम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विपुलीकरणं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| सूचनानां स्वीकरणम् | - | 2 |
| विपुलीकरणम् | - | 2 |
| वाक्यस्य पूर्णता | - | 1 |

## 4. प्रश्ननिर्देशः।

आरोग्यसंरक्षणमधिकृत्य लघूपन्यासं लिखत।

## पाठ्यचर्योद्देश्यम्।

निर्दिष्टविषयमधिकृत्य उपन्यासं रचयति।

## मानसिकव्यापाराः

आशयं क्रमीकृत्य लेखनम्।

| | | |
|---|---|---|
| समयः | - | 10 निमेषाः |
| अङ्काः | - | 5 |

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | आशयसंपुष्टतायै | - | 3 |
| | क्रमबद्धलेखनाय | - | 1 |
| | वाक्यस्य पूर्णतायै | - | 1 |
| | **आहत्य** | **-** | **5** |

# ६. तस्माद् व्यायाममाचरेत्

## 1. प्रश्ननिर्देशः।

यथोचितं योजयत।

**प्रश्नपाठः।**

| | |
|---|---|
| पठति स्म | अव्ययम् |
| अजित्वा | आरोग्यम् |
| बुद्धिः | पञ्चमी |
| व्यायामः | मतिः |
| ऋते | अपठत् |
| | कीर्तिः |

**पाठ्यचर्योद्देश्यम्।**

अमरकोश - शब्दरूप - धातुरूपाव्ययानां परिचयः।

**मानसिकव्यापाराः**

अपग्रथनं विवेचनं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** उचितस्य उत्तरस्य एकैकोऽङ्कः।

## 2. प्रश्ननिर्देशः।

मातृभाषायां विवर्तयत।

**प्रश्नपाठः।**

मानवजीवने आरोग्यस्य अद्वितीयं स्थानमस्ति। अरोगदृढगात्र एव कर्माणि सम्यक् निर्वोढुं शक्नोति। सर्वेषां महद्धनं भवति आरोग्यम्। मानवैः आरोग्यं परिपालयितुम् उचितं भक्षणं, उचितः

व्यायामः, उचिता दिनचर्या च स्वीकर्तव्यानि। व्यायामेषु दिनचर्यासु च योगविद्यायाः योगदानं महत्तरं भवति।

## पाठ्यचर्योद्देश्यम्।

भाषान्तरीकरणसामर्थ्यसम्पादनम्।

## मानसिकव्यापाराः

आशयापग्रथनम्, उचितपदचयनं च।

समयः - 10 निमेषाः

अङ्काः - 5

**मूल्यनिर्णयसूचकाः** एकैकस्य वाक्यस्य विवर्तनाय एकैकोऽङ्कः।

## 3. प्रश्ननिर्देशः।

अधोदत्तं श्लोकं पठित्वा 'नित्यं यद् अन्नं भक्षयेत् तादृशी प्रजा जायते' इत्याशयप्रतिपादकं श्लोकं विवेचयत।

## प्रश्नपाठः।

१. व्यायामपुष्टगात्रस्य बुद्धिस्तेजो यशो बलम्।
प्रवर्धन्ते मनुष्यस्य तस्माद् व्यायाममाचरेत्।

२. दीपो भक्षयते ध्वान्तं कज्जलं च प्रसूयते।
यदन्नं भक्षयेन्नित्यं जायते तादृशी प्रजा।।

## पाठ्यचर्योद्देश्यम्।

आरोग्यपरिपालनसम्बन्धिनां सुभाषितानां ज्ञानम्।

## मानसिकव्यापाराः

आशयापग्रथनं विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** निर्दिष्टाशयप्रतिपादकस्य श्लोकस्य विवेचनाय - 2

## 4. प्रश्ननिर्देशः।

अधोदत्तं श्लोकं पठित्वा मूत्रपुरीषयोः विसर्जनं बलात् निरुध्य कार्यान्तरव्यापृतो न भवेत् इत्याशयप्रतिपादकं श्लोकं विवेचयत।

### प्रश्नपाठः।

१. जीर्णे हितं मितं चाद्यात्
न वेगानीरयेद् बलात्।
न वेगितोऽन्यकार्यः स्यात्
नाजित्वा साध्यमामयम्।।

२. शीतोष्णौ चैव वायुश्च त्रयः शरीरजाः गुणाः।
तेषां गुणानां साम्यं यत्तदाहुः स्वास्थ्यलक्षणम्।।

### पाठ्यचर्योद्देश्यम्।

आरोग्यपरिपालनसम्बन्धिनां सुभाषितानां ज्ञानम्।

### मानसिकव्यापाराः

आशयापग्रथनं, विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** उचितश्लोकस्य चयनाय - 2

## 5. प्रश्ननिर्देशः।

अधोदत्तं श्लोकं पठित्वा 'व्यायामम् आचरतः बुद्ध्यादिकं प्रवर्धते' इत्याशयप्रतिपादकं श्लोकं विवेचयत।

## प्रश्नपाठः।

१. दीपो भक्षयते ध्वान्तं कज्जलं च प्रसूयते।
यदन्नं भक्षयेन्नित्यं जायते तादृशी प्रजा।।

२. व्यायामपुष्टगात्रस्य बुद्धिस्तेजो यशो बलम्।
प्रवर्धन्ते मनुष्यस्य तस्माद् व्यायाममाचरेत्।

## पाठ्यचर्योद्देश्यम्।

आरोग्यपरिपालनसम्बन्धिनां सुभाषितानां ज्ञानम्।

## मानसिकव्यापाराः

आशयापग्रथनं, विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** उचितश्लोकस्य चयनाय अङ्काः - 2

# पादवार्षिकमूल्यनिर्णयः - संस्कृतम्

## कक्ष्या - VIII

प्रश्नसञ्चयः संस्कृतविद्यालयानां कृते (Part II)

## एककम् - १

**1. प्रश्ननिर्देशः।**

श्लोकं पठित्वा अत्र कोऽलंकारः इति समर्थयत।

**प्रश्नपाठः।**

"मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः।।"

**पाठ्यचर्योद्देश्यम्।**

कालिदासस्य उपमाप्रयोगचातुर्यस्य ज्ञानम्। श्लोकं पठित्वा अलङ्कारं विवेचयति।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 8 निमेषाः

अङ्काः - 4

| | | | | |
|---|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | (अ) | अपग्रथनाय | - | 1 |
| | (आ) | अलङ्कारनिर्णयाय | - | 1 |
| | (इ) | समर्थनाय | - | 2 |
| | | **आहत्य** | **-** | **4** |

## 2. प्रश्नपाठः।

१. अइउण्  २. ऋलृक्  ३. एओङ्  ४. ऐऔच्।

उपरि लिखितानि माहेश्वरसूत्राणि पठित्वा अधोदत्तेषु प्रत्याहारेषु अन्तर्भूतान् वर्णान् विविच्य लिखत।

१. अक्  २. इक्  ३. एच्  ४. अच्

उदाहरणम् - अण् - अ, इ, उ।

## पाठ्यचर्योद्देश्यम्।

माहेश्वरसूत्राणि पठित्वा प्रत्याहारनिर्माणसामर्थ्यसम्पादनम्।

## मानसिकव्यापाराः

आशयग्रहणं विवेचनं च।

समयः - 8 निमेषाः

अङ्काः - 4

| | | | | |
|---|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | 1. | अ इ उ ऋ लृ | - | 1 |
| | 2. | इ उ ऋ लृ | - | 1 |
| | 3. | ए ओ ऐ औ | - | 1 |
| | 4. | अ इ उ ऋ लृ ए ओ ऐ औ | - | 1 |
| | | **आहत्य** | **-** | **4** |

## 3. प्रश्नपाठः।

अधोदत्ताः वर्णाः प्रत्याहाराणां नाम्ना सह योजयतु।

| *वर्णाः* | *प्रत्याहाराः* |
|---|---|
| श, ष स | यण् |
| ए ओ ऐ औ | शर् |
| य व र ल | एच् |

**पाठ्यचर्योद्देश्यम्।**

प्रत्याहारं पठित्वा वर्णविवेचनसामर्थ्यसम्पादनम्।

**मानसिकव्यापाराः**

आशयग्रहणम्।

समयः - 6 निमेषाः

अङ्काः - 3

| | | | | | | |
|---|---|---|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | 1. | श ष स | - | शर् | - | 1 |
| | 2. | ए ओ ऐ औ | - | एच् | - | 1 |
| | 3. | य व र ल | - | यण्- | | 1 |
| | | **आहत्य** | **-** | **3** | | |

## 4. प्रश्नपाठः।

अधोदत्तान् वर्णान् उच्चारणस्थानानुसारं पट्टिकायां योजयतु।

अ ग च य ऋ ष

***कण्ठः*** ***तालुः*** ***मूर्धा***

**पाठ्यचर्योद्देश्यम्।**

वर्णानाम् उच्चारणस्थानं विविच्य जानाति।

**मानसिकव्यापाराः**

स्मरणम्, आशयग्रहणं, विवेचनं च।

समयः - 12 निमेषाः

अङ्काः - 6

| **मूल्यनिर्णयसूचकाः** | ***कण्ठः*** | ***तालु*** | ***मूर्धा*** |
|---|---|---|---|
| | अ | च | ॠ |
| | ग | य | ष |

एकैकस्य पूरणाय द्वौ अङ्कौ। **आहत्य - 6**

## 5. प्रश्नपाठः।

अधोलिखितेषु अर्थालङ्कारः कः ?

(अनुप्रासम्, उपमा, यमकम्)

**पाठ्यचर्योद्देश्यम्।**

अलङ्कारान् विवेचयति।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 2 निमेषाः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** उपमा इति लेखनाय एक अङ्कः।

## 6. प्रश्नपाठः।

वाक्यांशं पठित्वा अलङ्कारस्य नाम लिखत।

कमलम् इव मुखं शोभते।

**पाठ्यचर्योद्देश्यम्।**

अलङ्काराणां विविच्य ज्ञानम्।

**मानसिकव्यापाराः**

आशयापग्रथनम्। निर्णयः।

समयः - 4 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** उपमा इति लेखनाय द्वौ अङ्कौ।

## 7. प्रश्नपाठः।

उपमालङ्कारस्य चत्वारो घटकाः के?

**पाठ्यचर्योद्देश्यम्।**

अलङ्कारस्य लक्षणं सव्याख्यानं जानाति।

**मानसिकव्यापाराः**

आशयापग्रथनम्।

समयः - 5 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः**

1. उपमानम्।
2. उपमेयम्।
3. उपमावाचकम्।
4. साधारणधर्मः।

## 8. प्रश्नपाठः।

उपमालङ्कारस्य लक्षणम् उदाहरणं च लिखत।

**पाठ्यचर्योद्देश्यम्।**

अलङ्काराणां परिचयं सम्पादयति।

**मानसिकव्यापाराः**

स्मरणम्।

| | | |
|---|---|---|
| समयः | - | 8 निमेषाः |
| अङ्काः | - | 4 |

**मूल्यनिर्णयसूचकाः**

| | | | |
|---|---|---|---|
| 1. | लक्षणलेखनाय | - | 2 |
| 2. | उदाहरणलेखनाय | - | 2 |
| | **आहत्य** | **-** | **4** |

## 9. प्रश्नपाठः।

प्रदत्तं गद्यभागं पठित्वा अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत।

केरलेषु अनेके उत्सवाः सन्ति। तत्र श्रावणोत्सवः प्रमुखं स्थानमर्हति। श्रावणमासे हस्तनक्षत्रे श्रावणोत्सवस्य आरम्भः। बालैः गृहाङ्गणे पुष्पचित्राणि विरच्यन्ते। गृहनाथः गृहे सर्वेषां कृते नवानि वस्त्राणि प्रददाति। तद्दिने गृहे सर्वे मिलित्वा विशिष्टं भोजनं कुर्वन्ति। महाबलिः प्रजादर्शनार्थं श्रावणदिने आगच्छति इति जनानां विश्वासः।

1. कस्मिन् मासे श्रावणोत्सवः आघुष्यते ?
2. श्रावणोत्सवस्य आरम्भः कदा ?
3. कः नवानि वस्त्राणि प्रददाति ?
4. श्रावणमहोत्सवमधिकृत्य जनानां विश्वासः कः ?
5. अस्याः खण्डिकायाः उचितं शीर्षकं लिखत ?

**पाठ्यचर्योद्देश्यम्।**

गद्यांशं पठित्वा आशयम् अवगच्छति।

**मानसिकव्यापाराः**

आशयापग्रथनं विविच्य लेखनं च।

| | | |
|---|---|---|
| समयः | - | 10 निमेषाः |
| अङ्काः | - | 5 |

**मूल्यनिर्णयसूचकाः** समीचीनस्य एकैकस्य उत्तरस्य कृते एकैकोऽङ्कः।

## 10. प्रश्नपाठः।

श्लोकं पठित्वा अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत।

"क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीषुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।"

1. च + अल्पविषया - चाल्पविषया। एवं चेत् उडुपेनास्मि इति पदं विश्लेषयत।
2. तरितुम् इच्छुः इत्यस्य एकपदं लिखत।
3. समुद्रम् इत्यर्थकं पदं श्लोकादुद्धृत्य लिखत।
4. श्लोकस्य अस्य आशयं लिखत?

### पाठ्यचर्योद्देश्यम्।

पद्यं पठित्वा आशयावगमः। सन्धिज्ञानसम्पादनम्। विग्रहावबोधः।

### मानसिकव्यापाराः

आशयापग्रथनम्।

समयः - 10 निमेषाः

अङ्काः - 6

### मूल्यनिर्णयसूचकाः

| | | |
|---|---|---|
| 1. | उडुपेन + अस्मि | 1 |
| 2. | तितीर्षुः | 1 |
| 3. | सागरम् | 1 |
| 4. | आशयलेखनाय | 3 |
| | **आहत्य** | **6** |

## 11. प्रश्नपाठः।

पुस्तकम् इति पदे पु इत्यक्षरः लघु वा गुरु वा? कारणं लिखत।

### पाठ्यचर्योद्देश्यम्।

गुरुलघु विवेचनसामर्थ्यम्।

**मानसिकव्यापाराः**

आशयापग्रथनम्।

| | | |
|---|---|---|
| समयः | - | 4 निमेषाः |
| अङ्काः | - | 2 |

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | पु इति अक्षरं गुरु इति लेखनाय | - | 1 |
| | संयुक्ताक्षरात्पूर्वस्य लघोः गुरुत्वमिति लेखनाय | - | 1 |
| | **आहत्य** | - | **2** |

## 12. प्रश्नपाठः।

अनुष्टुप् वृत्तस्य लक्षणम् सोदाहरणं विशदयत।

**पाठ्यचर्योद्देश्यम्।**

वृत्तज्ञानं सम्पादयति।

**मानसिकव्यापाराः**

स्मरणम्।

| | | |
|---|---|---|
| समयः | - | 10 निमेषाः |
| अङ्काः | - | 5 |

| | | | |
|---|---|---|---|
| **मूल्यनिर्णयसूचकाः** | लक्षणस्य लेखनाय | - | 2 |
| | उदाहरणस्य लेखनाय | - | 2 |
| | विशदीकरणाय | - | 1 |
| | **आहत्य** | - | **5** |

## 13. प्रश्नपाठः।

अधो लिखितानां पदानां गणनिर्णयं कुरुत।

पठति, सुधर्मा, लक्ष्मणः, भरतः, गोपालः, रामस्य

## पाठ्यचर्योद्देश्यम्।

गुरुलघुविवेचनपूर्वकं गणनिर्णयः।

## मानसिकव्यापाराः

अपग्रथनं निर्णयश्च।

समयः - 20 निमेषाः

अङ्काः - 12

| | | |
|---|---|---|
| **मूल्यनिर्णयसूचकाः** | गुरुलघुविवेचनाय | 1 |
| | गणस्य लेखनाय | 1 |
| | **आहत्य** | **6 x 2 = 12** |

## 14. प्रश्नपाठः।

गणविवेचन ज्ञानं सम्पादयति।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।

सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्।।

## पाठ्यचर्योद्देश्यम्।

वृत्तपठने गणव्यवस्थाज्ञानमावश्यकम्।

## मानसिकव्यापाराः

आशयापग्रथनं निर्णयश्च।

समयः - 16 निमेषाः

अङ्काः - 8

| | | |
|---|---|---|
| **मूल्यनिर्णयसूचकाः** | गुरुलघुविवेचनाय। | 1 |
| | गणलेखनाय। | 1 |
| | **आहत्य** | **2 x 4 = 8** |

## 15. प्रश्नपाठः।

कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।

1. यगणः - (मध्यलघु, आदिगुरु, आदिलघु)
2. मगणः - (सर्वगुरुः, आदिलघु, अन्तगुरु)
3. जगणः - (मध्यलघु, मध्यगुरु, सर्वलघु)

## पाठ्यचर्योद्देश्यम्।

गणव्यवस्थाज्ञानं सम्पादयति।

## मानसिकव्यापाराः

स्मरणम् अपग्रथनं च।

समयः - 6 निमेषाः

अङ्काः - 3

**मूल्यनिर्णयसूचकाः**

| | | | | | |
|---|---|---|---|---|---|
| 1. | यगणः | - | आदिलघु | - | 1 |
| 2. | मगणः | - | सर्वगुरु | - | 1 |
| 3. | जगणः | - | मध्यगुरु | - | 1 |
| | **आहत्य** | | | - | **3** |